"एवं स राजा धर्म्मात्मा नरिष्यन्तोऽभवत् पुरा ।
मरुत्ततनयो विप्र ! विख्यातबलपौरुषः ॥"
"नरिष्यन्तस्य तनयो दुष्टारिदमनो दमः ।
शक्रस्येव बलं तस्य दयाशीलं मुनेरिव ॥
बाभ्रव्यामिन्द्रसेनायां स जज्ञे तस्य भूभृतः ।
नववर्षाणि जठरे स्थित्वा मातुर्महायशाः ॥
यद्ग्राहयामास दमं मातरं जठरे स्थितः ।
दमशीलश्च भविता यतश्चायं नृपात्मजः ॥
ततस्त्रिकालविज्ञानः स हि तस्य पुरोहितः ।
दम इत्यकरोत् नाम नरिष्यन्तसुतस्य तु ॥
स दमो राजपुत्त्रस्तु धनुर्व्वेदमशेषतः ।
जग्राहे नरराजस्य सकाशाद्वृषपर्व्वणः ॥"

अस्य विशेषविवरणन्तु तत्रैवाध्याये विशेषतो द्रष्टव्यम् ॥ भीमस्य राज्ञः पुत्त्रविशेषः । यथा, महाभारते । ३ । ५३ । ९ ।

"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ॥"

विष्णुः । यथा, तत्रैव । १३ । १४९ । १०५ ।

"धनुर्धरो धनुर्व्वेदो दान्तो दमयिता दमः ॥")

दमकः, त्रि, (दमयतीति । दम + णिच् + ण्वुल् ।) दमनकर्त्ता । इति व्याकरणम् ॥ (यथा मनुः । ३ । १६२ ।

"हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ॥")

दमघोषः, पु, चन्द्रवंशीयराजविशेषः । स चेदिदेशपतिः शिशुपालपिता च । इति पुराणम् ॥ (यथा, भागवते । ९ । २४ । ३९ ।

"दमघोषश्चेदिराजः श्रुतश्रवसमग्रहीत् ॥")

दमघोषसुतः, पुं, (दमघोषस्य सुतः ।) शिशुपालः । इति त्रिकाण्डशेषः ॥

दमथः, पुं, (दम उपशमे + "वाहुलकात् दृशमिदमिभ्यश्च ।" ३ । ११४ । इति अथः । इत्युज्ज्वलदत्तः ।) दमः । दण्डः । इत्युणादिकोषः ॥

दमनं, क्ली, (दम + भावे ल्युट् ।) दण्डः । यथा,

"अत्युच्छ्रितस्य दमनमुचितञ्च श्रुतौ श्रुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दमनः, पुं, (दाम्यतीति । दम + ल्युः ।) पुष्पविशेषः । दोना इति भाषा । तत्पर्य्यायः । पुष्पचामरः २ । इति त्रिकाण्डशेषः ॥ (यथा,

"दमनस्तु वरस्तिक्तो हृद्यो वृष्यः सुगन्धिकः ।
ग्रहण्यशविषकुष्ठास्रक्लेदकण्डूत्रिदोषजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वीरः । उपशान्तः । इति शब्दरत्नावली ॥ कुन्दवृक्षः । इति राजनिर्घण्टः ॥ (ऋषिविशेषः । यथा, महाभारते । ३ । ५३ । ६ ।

"तमभ्यगच्छत् ब्रह्मर्षिर्दमनो नाम भारत ! ।
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित् ॥"

अस्य भीमस्य पुत्त्रविशेषः । यथा, तत्रैव । ३ । ५३ । ९ ।

"कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ।
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ॥"

विष्णुः । यथा, महाभारते । १३ । १४९ । ३४ ।

"मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ॥"
"स्वाधिकारात् प्रमाद्यन्तीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण स दमनः ।" इति तद्भाष्ये शङ्कराचार्य्यः ॥ महादेवः । यथा, महाभारते । १३ । १७ । १३६ ।

"महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥")

दमनकः, पुं, (दमन एव । स्वार्थे कन् ।) वृक्षविशेषः । दोना इति भाषा । तत्पर्य्यायः । दमनः २ दान्तः ३ गन्धोत्कटा ४ मुनिः ५ जटिला ६ दण्डी ७ पाण्डुरागः ८ ब्रह्मजटा ९ पुण्डरीकः १० तापसपत्त्री ११ पत्त्री १२ पवित्रकः १३ देवशेखरः १४ कुलपत्त्रः १५ विनीतः १६ तपस्विपत्त्रः १७ । इति राजनिर्घण्टः ॥ मुनिपुत्त्रः १८ तपोधनः १९ गन्धोत्कटः २० ब्रह्मजटी २१ कुलपुत्त्रकः २२ । इति भावप्रकाशः ॥ अस्य गुणाः । शीतलत्वम् । तिक्तत्वम् । कषायत्वम् । कटुत्वम् । कुष्ठदोषद्वन्द्वत्रिदोषविषविस्फोटविकारहरत्वञ्च । इति राजनिर्घण्टः ॥ हृद्यत्वम् । वृष्यत्वम् । सुगन्धित्वम् । ग्रहण्यस्रक्लेदकण्डूनाशित्वञ्च । इति भावप्रकाशः ॥ (क्ली, षड्वर्णच्छन्दोविशेषः । यथा, चिन्तामणिधृतवचनम् ।

"द्विगुणनगणमिह वितनु हि ।
दमनकमिति गदति शुचि हि ॥"

एकादशाक्षरच्छन्दोविशेषोऽपि । यथा, तत्रैव ।

"द्विजवरगणयुगममलं तदनु च कलय करतलम् ।
फणिपतिवरपरिगदितं दमनकमिदमतिललितम् ॥")

दमनकारोपणोत्सवः, पुं, (दमनकस्य आरोपणार्थं य उत्सवः ।) श्रीकृष्णस्य दमनकार्पणार्थमहापूजारूपोत्सवः । यथा,—

"चैत्रस्य शुक्लद्वादश्यां दमनारोपणोत्सवम् ।
विदध्यात्तद्विधिर्बौधायनाद्युक्तोऽत्र लिख्यते ॥
मधोः सितैकादश्याञ्च प्रातःकृत्यं समाप्य च ।
गत्वा दमनकारामं तत्राशोकं स्मरं यजेत् ॥
तत्र मन्त्रः ।
अशोकाय नमस्तुभ्यं कामस्त्रीशोकनाशन ! ।
शोकार्त्तिं हर मे नित्यमानन्दं जनयस्व मे ॥
नेष्यामि कृष्णपूजार्थं त्वां कृष्णप्रीतिकारकम् ।
इति संप्रार्थ्य नत्वा च गृह्णीयाद्दमनं शुभम् ॥
प्रोक्ष्य तत् पञ्चगव्येन प्रक्षाल्याद्भिः प्रपूज्य च ।
वस्त्रेणाच्छाद्य वेदादिघोषेण गृहमानयेत् ॥*॥
अथ दमनकाधिवासविधिः ।
कृष्णस्याग्रे समुद्धृत्य सर्व्वतोभद्रमण्डलम् ।
निधाय दमनं तत्र रात्रौ तदधिवासयेत् ॥
तत्र मन्त्रः ।
पूजार्थं देवदेवस्य विष्णोर्लक्ष्मीपतेः प्रभोः ।
दमन ! त्वमिहागच्छ सान्निध्यं कुरु ते नमः ॥ इति
सबीजं कामदेवञ्च तथा भस्मशरीरकम् ।
अनङ्गं मन्मथञ्चैव वसन्तसखमेव च ॥
स्मरं तथेक्षुचापञ्च पुष्पवाणञ्च पूजयेत् ।
प्रागादिदिक्षु रत्याढ्यं विधिवद्दमने क्रमात् ॥
अष्टोत्तरशतं कामगायत्र्या चाभिमन्त्र्य तत् ।
दत्त्वा पुष्पाञ्जलिं कामदेवं वन्देत मन्त्रवत् ॥
मन्त्रश्चायम् ।
नमोऽस्तु पुष्पवाणाय जगदाह्लादकारिणे ।
मन्मथाय जगन्नेत्रे रतिप्रीतिप्रदायिने ॥ इति ॥
आमन्त्रितोऽसि देवेश ! पुराणपुरुषोत्तम ! ।
प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ! ॥
निवेदयाम्यहं तुभ्यं प्रातर्द्दमनकं शुभम् ।
सर्व्वथा सर्व्वदा विष्णो ! नमस्तेऽस्तु प्रसीद मे ॥
इत्यमामन्त्र्य देवेशं दत्त्वा पुष्पाञ्जलिं पुनः ।
गीतनृत्यादिना रात्रौ कुर्य्याज्जागरणं मुदा ॥*॥
अथ दमनकार्पणविधिः ।
प्रातःस्नानादि निर्व्वर्त्त्य नित्यपूजां विधाय च ।
दमनारोपणार्थञ्च महापूजां समाचरेत् ॥
ततो दमनकं भक्त्या पाणिभ्यां परिगृह्य च ।
घण्टादिवाद्यघोषेण श्रीकृष्णाय समर्पयेत् ॥
तत्र मन्त्रः ।
देवदेव जगन्नाथ वाञ्छितार्थप्रदायक ! ।
हृत्स्थान् पूरय मे कृष्ण कामान् कामेश्वरीप्रिय ! ॥
इदं दमनकं देव गृहाण मदनुग्रहात् ।
इमां सांवत्सरीं पूजां भगवन्निह पूरय ॥ इति ॥
ततो दामनकीं मालां गन्धादीनि समर्प्य च ।
गीतादिनोत्सवं कृत्वा श्रीकृष्णं प्रार्थयेदिदम् ॥
मणिविद्रुममालाभिर्म्मन्दारकुसुमादिभिः ।
इयं सांवत्सरी पूजा तवास्तु गरुड़ध्वज ! ॥
वनमालां यथा देव ! कौस्तुभं सततं हृदि ।
तद्वद्दामनकीं मालां पूजाञ्च हृदये वहेत्यादि ॥
भगवन्तं प्रणम्याथ गुरुं संपूज्य भक्तितः ।
संपूज्य ब्राह्मणान् शक्त्या भुञ्जीत सह बन्धुभिः ॥
पारणाहे न लभ्येत द्वादशी घटिकापि चेत् ।
तदा त्रयोदशी ग्राह्या पवित्रा दमनार्पणे ॥
न कृष्णे दमनारोपः स्यान्मधौ विघ्नतो यदि ।
वैशाख्यां श्रावणे मासि कर्त्तव्यं वा तदर्पणम् ॥
अतएवोक्तं ब्रह्मणा देवीपुराणे ।
चैत्रादौ कारयेत् पूजां सम्यग्वत्स ! यथाविधि ॥
गन्धधूपार्घ्यनैवेद्यैर्म्माल्यैर्द्दमनकोद्भवैः ।
सहोमं पूजयेद्देवं सर्व्वान् कामानवाप्नुयात् ॥
सर्व्वतीर्थाभिषेकस्य फलं प्राप्नोति मानवः ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥

दमनी, स्त्री, (दम्यतेऽग्निरनया । दम + ल्युट् । स्त्रियां ङीप् ।) अग्निदमनीवृक्षः । इति राजनिर्घण्टः ॥

दमयन्ती, स्त्री, (दमयति नाशयति अमङ्गलादिकमिति । दम + णिच् + शतृ + ङीप् ।) भद्रमल्लिका । इति शब्दमाला ॥ नलराजपत्नी । सा विदर्भदेशीयभीमराजकन्या । (यथा, महाभारते । ३ । ५३ । ५-९ ।

"तथैवासीद्विदर्भेषु भीमो भीमपराक्रमः ।
शूरः सर्व्वगुणैर्युक्तः प्रजाकामः स चाप्रजः ॥
स प्रजार्थे परं यत्नमकरोत् सुसमाहितः ।
तमभ्यगच्छद्ब्रह्मर्षिर्दमनो नाम भारत ! ॥
तं स भीमः प्रजाकामस्तोषयामास धर्म्मवित् ।